# Nilakrita Anjaneyastotram

# નીલકૃત આઞ્જનેયસ્તોત્રમ્

## Document Information

Text title : Anjaneya Stotram 1 Nilakrita

File name : AnjaneyastotramnIlakRita.itx

Category : hanumaana

Location : doc_hanumaana

Transliterated by : Gopal Upadhyay gopal.j.upadhyay at gmail.com

Proofread by : Gopal Upadhyay, PSA Easwaran

Source : ParAsharasamhita Hanumachcharitra Vol 1 page 24

Latest update : July 16, 2016

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 30, 2023

*sanskritdocuments.org*

# નીલકૃત આઞ્જનેયસ્તોત્રમ્

ૐ જય જય । શ્રીઆઞ્જનેય । કેસરીપ્રિયનન્દન । વાયુકુમાર ।
ઈશ્વરપુત્ર । પાર્વતીગર્ભસમ્ભૂત । વાનરનાયક ।
સકલવેદશાસ્ત્રપારગ । સઞ્જીવનીપર્વતોત્પાટન ।
લક્ષ્મણપ્રાણરક્ષક । ગુહપ્રાણદાયક । સીતાદુઃખનિવારક ।
ધાન્યમાલી શાપવિમોચન । દુર્દણ્ડીબન્ધવિમોચન ।
નીલમેઘરાજ્યદાયક । સુગ્રીવરાજ્યદાયક । ભીમસેનાગ્રજ ।
ધનઞ્જયધ્વજવાહન । કાલનેમિસંહાર । મૈરાવણમર્દન ।
વૃત્રાસુરભઞ્જન । સપ્તમન્ત્રિસુતધ્વંસન । ઇન્દ્રજિદ્વધકારણ ।
અક્ષકુમારસંહાર । લઙ્કિણીભઞ્જન । રાવણમર્દન ।
કુમ્ભકર્ણવધપરાયણ । જમ્બુમાલિનિષૂદન । વાલિનિબર્હણ ।
રાક્ષસકુલદાહન । અશોકવનવિદારણ । લઙ્કાદાહક ।
શતમુખવધકારણ । સપ્તસાગરવાલસેતુબન્ધન ।
નિરાકાર-નિર્ગુણ-સગુણસ્વરૂપ । હેમવર્ણપીતામ્બરધર ।
સુવર્ચલાપ્રાણનાયક । ત્રિંશત્કોટ્યર્બુદરુદ્રગણપોષક ।
ભક્તપાલનચતુર । કનકકુણ્ડલાભરણ ।
રત્નકિરીટહારનૂપુરશોભિત । રામભક્તિતત્પર ।
હેમરમ્ભાવનવિહાર વક્ષતાઙ્કિતમેઘવાહક ।
નીલમેઘશ્યામ । સૂક્ષ્મકાય । મહાકાય । બાલસૂર્યગ્રસન ।
ઋષ્યમૂકગિરિનિવાસક । મેરુપીઠકાર્ચન । દ્વાત્રિંશદાયુધધર ।
ચિત્રવર્ણ । વિચિત્રસૃષ્ટિનિર્માણકર્ત્રે । અનન્તનામ ।
દશાવતાર । અઘટનઘટનાસમર્થ । અનન્તબ્રહ્મન્ ।
નાયક । દુર્જનસંહાર । સુજનરક્ષક । દેવેન્દ્રવન્દિત ।
સકલલોકારાધ્ય । સત્યસઙ્કલ્પ । ભક્તસઙ્કલ્પપૂરક ।
અતિસુકુમારદેહ । અકર્દમવિનોદલેપન । કોટિમન્મથાકાર ।
રણકેલિમર્દન । વિજૃમ્ભમાણસકલલોકકુક્ષિમ્ભર ।

સપ્તકોટિમહામન્ત્રતન્ત્રસ્વરૂપ ।
ભૂતપ્રેતપિશાચશાકિનીડાકિનીવિધ્વંસન ।
શિવલિઙ્ગપ્રતિષ્ઠાપનકારણ । દુષ્કર્મવિમોચન ।
દૌર્ભાગ્યનાશન । જ્વરાદિસકલરોગહર । ભુક્તિમુક્તિદાયક ।
કપટનાટકસૂત્રધારિન્ । તલાવિનોદાઙ્કિત । કલ્યાણપરિપૂર્ણ ।
મઙ્ગલપ્રદ । ગાનલોલ । ગાનપ્રિય । અષ્ટાઙ્ગયોગનિપુણ ।
સકલવિદ્યાપારીણ । આદિમધ્યાન્તરહિત । યજ્ઞકર્ત્રે ।
યજ્ઞભોક્ત્રે । ષણ્મતવૈભવસાનુભૂતિચતુર । સકલલોકાતીત ।
વિશ્વમ્ભર । વિશ્વમૂર્તે । વિશ્વાકાર । દયાસ્વરૂપ ।
દાસજનહૃદયકમલવિહાર । મનોવેગગમન । ભાવજ્ઞનિપુણ ।
ઋષિગણગેય । ભક્તમનોરથદાયક । ભક્તવત્સલ ।
દીનપોષક । દીનમન્દાર । સર્વસ્વતન્ત્ર । શરણાગતરક્ષક ।
આર્તત્રાણપરાયણ । એક અસહાયવીર । હનુમન્ વિજયીભવ ।
દિગ્વિજયીભવ । દિગ્વિજયીભવ ।

ઇતિ નીલકૃતં શ્રીઆઞ્જનેયસ્તોત્રમ્ ।

ParAsharasamhita Hanumachcharitra Vol 1 page 24
Encoded by Gopal Upadhyay gopal.j.upadhyay at gmail.com
Proofread by Gopal Upadhyay, PSA Easwaran

*Nilakrita Anjaneyastotram*
pdf was typeset on August 30, 2023

Please send corrections to *sanskrit@cheerful.com*